## षष्ठः पाठः



# प्रेमलस्य प्रेमल्याश्च कथा

[प्रस्तुत कहानी शिक्षाविद् गिजु भाई (1885-1939) की रचना 'पेमला पेमली की कहानी' का अनुवाद है। गुजरात के भावनगर के विद्यालय में पढ़ाते हुए उन्होंने बाल शिक्षण के क्षेत्र में अनेक प्रयोग किए। लम्बा समय गुजर जाने के बावजूद उनके विचार प्रासङ्गिक हैं। इस कहानी में एक महिला घरेलू कामों को पूरा करने की अपनी पारम्परिक भूमिका को वाक् चातुर्य से बदलने की कोशिश करती है।]

**उपसर्गः प्रत्ययश्च**

एकः आसीत् प्रेमलः एका चासीत् प्रेमली। काष्ठच्छेदेन श्रान्तः प्रेमलः सायंकाले गृहमागच्छत्, प्रेमलीं चावदत्- प्रेमलि! अद्य खलु भृशं श्रान्तोऽस्मि। मह्यं जलम् उष्णं कृत्वा देहि। अहं स्नात्वा तस्मिन् जले चरणौ स्थापयामि। तेन मम श्रान्तिः अपगमिष्यति।

प्रेमली अवदत्- तवानुरोधं कथमहम् अस्वीकुर्याम्? पश्य, तत्र हण्डी उपरि स्थापिता। ताम् अवतारय। प्रेमलः हण्डीमवातारयत्। ततः स अवदत्- अधुना किं करोमि? प्रेमली अवदत्- निकटे कूपः वर्तते। तत्र गत्वा जलं भृत्वा आनय। प्रेमलः घटे जलं सम्पूर्य आगच्छत्। पुनः प्रेमलीम् अपृच्छत्- इदानीं किम्?

प्रेमली अवदत्- अधुना चुल्यां काष्ठानि प्रज्ज्वालय। प्रेमलः काष्ठानि प्रज्ज्वाल्य अपृच्छत्- अग्रे किं करवाणि? प्रेमली अकथयत्- यावत् चुल्ली सम्यक् न ज्वलति, तावत् फूत्कुरु, किमन्यत्? प्रेमलेन चुल्ली सम्यक् प्रज्ज्वालिता। अथ च अपृच्छत्- अधुना किम् करवाणि? प्रेमली अवदत्- घटात् हण्ड्यां जलं पूरय। ततः हण्डीं चुल्याम् उपरि स्थापय।

© NCERT not to be republished

प्रेमलः हण्डीं चुल्याम् अस्थापयत्। किञ्चित् कालानन्तरं च पुनः प्रेमलीम् अपृच्छत्- इदानीं किं करवाणि? प्रेमली अवदत्– किमन्यत्, हण्डीम् अवतारय।



हण्डीमवतार्य प्रेमलः पृच्छति- अधुना? प्रेमली वदति–अधुना हण्डीं स्नानगृहे स्थापय। प्रेमलः हण्डीं स्नानगृहे निधाय पृच्छति- अधुना? प्रेमली निरदिशत्-सम्प्रति स्नानं कुरु। प्रेमलः स्नात्वा अपृच्छत्-अधुना किं करणीयम्?

प्रेमली अवदत्- इदानीं हण्डीं यथास्थानं निधेहि। प्रेमलः हण्डीं संस्थाप्य शरीरं हस्तेन संस्पृश्य अकथयत्- अरे, कीदृशं पुष्पमिव शरीरं लघु जातम्। यदि त्वं प्रतिदिनं एवमेव जलम् उष्णं कृत्वा मह्यं ददासि तर्हि कियत् शोभनं भवेत्। प्रेमली अवदत्- किमहं न इति कथयामि? परन्तु अत्र कस्य आलस्यम्? प्रेमलः अवदत्- आलस्यं तु ममैव। परम् अग्रे आलस्यं न करिष्यामि।

प्रेमली अवदत्- अस्तु! सम्प्रति आवां भोजनं कुर्वः।




| | | |
|---|---|---|
| **काष्ठच्छेदेन** | – | लकड़ियाँ काटने से |
| **खलु** | – | अवश्य ही (अव्यय) |
| **स्नात्वा** | – | स्नान करके |
| **श्रान्तिः** | – | थकान |
| **अपगमिष्यति** | – | दूर हो जाएगी |
| **अस्वीकुर्याम्** | – | अस्वीकार करूँ |
| **हण्डी** | – | हड़िया |
| **अवातारयत्** (अव+अतारयत्) | – | उतार लिया |
| **भृत्वा** | – | भरकर |
| **चुल्याम्** | – | चूल्हे में, पर |
| **काष्ठानि** | – | लकड़ियों को |
| **प्रज्ज्वालय** | – | जलाओ |
| **सम्यक्** | – | अच्छी तरह से |
| **फूत्कुरु** | – | फूँको |
| **कालानन्तरम्** (काल+अनन्तरम्) | – | समय के बाद |
| **निधाय** | – | रखकर |
| **निरदिशत्** (निः+अदिशत्) | – | निर्देश किया |
| **संस्थाप्य** | – | रखकर |
| **संस्पृश्य** | – | छूकर |
| **कीदृशम्** | – | कैसा |
| **लघु** | – | हल्का |
| **कियत्** | – | कितना |

## अभ्यासः



**1. एकपदेन उत्तरत–**

(क) प्रेमलः कथं श्रान्तः आसीत्?

(ख) प्रेमलः कदा गृहम् आगच्छत्?

(ग) प्रेमलः कानि प्राज्वालयत्?

(घ) चुल्लीं प्रज्वालयितुं प्रेमलः किं कृतवान्?

(ङ) प्रेमली कस्य पत्नी आसीत्?

**2. अधोलिखितेषु पदेषु उपसर्गं चित्वा पृथक् कुरुत–**

| | | | | |
|---|---|---|---|---|
| **यथा**–अपगमिष्यति | = | अप | + | गमिष्यति |
| अवतारय | = | ............. | + | ............. |
| प्रज्ज्वाल्य | = | ............. | + | ............. |
| प्रहारः | = | ............. | + | ............. |
| पराजयः | = | ............. | + | ............. |
| उपहारः | = | ............. | + | ............. |

**3. अधोलिखितेषु पदेषु उदाहरणानुसारेण धातुं प्रत्ययं च पृथक् कुरुत–**

| | पदानि | | धातुः | | प्रत्ययः |
|---|---|---|---|---|---|
| (क) **यथा** – | गत्वा | = | गम् | + | क्त्वा |
| | कृत्वा | = | ............. | + | ............. |
| | भृत्वा | = | ............. | + | ............. |
| | स्नात्वा | = | ............. | + | ............. |

© NCERT not to be republished

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| (ख) | **यथा** – | पठितुम् | = | पठ् | + | | | तुमुन् |
| | | कर्तुम् | = | .............. | + | | | .............. |
| | | खादितुम् | = | .............. | + | | | .............. |
| | | द्रष्टुम् | = | .............. | + | | | .............. |
| | | **पदानि** | | **उपसर्गः** | | **धातुः** | | **प्रत्ययः** |
| (ग) | **यथा** – | आनीय | = | आ | + | नी | + | ल्यप् |
| | | आगत्य | = | .............. | + | .............. | + | .............. |
| | | निधाय | = | .............. | + | .............. | + | .............. |
| | | आदाय | = | .............. | + | .............. | + | .............. |
| | | संस्पृश्य | = | .............. | + | .............. | + | .............. |

**4. मञ्जूषातः समानार्थकपदानि चित्वा रिक्तस्थानानि पूरयत–**

| निकटे | अधुना | कथयति | ददासि | हस्तेन | संस्थाप्य | पुष्पम् | तनुः |
|---|---|---|---|---|---|---|---|

करेण = ..............

कुसुमम् = ..............

यच्छसि = ..............

स्थापयित्वा = ..............

वदति = ..............

साम्प्रतम् = ..............

शरीरम् = ..............

पार्श्वे = ..............

© NCERT not to be republished

5. **निर्देशानुसारम् उपसर्गं क्रियापदं च पृथक् कुरुत-**

| | | | | | |
|---|---|---|---|---|---|
| **यथा** - | प्राचलत् | = | प्र | + | अचलत् |
| | निरदिशत् | = | .............. | + | .............. |
| | आगच्छत् | = | .............. | + | .............. |
| | अवातारयत् | = | .............. | + | .............. |
| | पराभवत् | = | .............. | + | .............. |
| | प्राक्षालयत् | = | .............. | + | .............. |

6. **अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत-**

(क) सः हण्डीमवातारयत्।
(ख) सः चुल्लीमज्वालयत्।
(ग) सः हण्डीं स्नानगृहे अस्थापयत्।
(घ) सः घटे जलमभरत्।
(ङ) प्रेमलः गृहमागच्छत्।
(च) सः जलमुष्णमकरोत्।
(छ) सः भोजनमकरोत्।
(ज) सः स्नानमकरोत्।

7. **अधोलिखितानां तद्भवपदानां तत्समपदानि चिनुत-**

काठ – ..............
हाँडी – ..............
चूल्हा – ..............
कूआँ – ..............
फूँकना – ..............

© NCERT not to be republished